श्री अर्गला स्तोत्रम्

Shri Argala Stotram

Source: Internet Archive — Shri Durga Saptashati, Gita Press, 1952 first edition, PDF 21–24 (controlling print). Also compared: Internet Archive — Shri Durga Saptashati, Gita Press large-type reprint, 1991, PDF 38–42 (second print check); Sanskrit Wikisource — Argala Stotram, revision 305095 (27-verse recension, comparison only); Internet Archive — Durga Saptashati, Ganesh Press, Varanasi, 1870 (different recension, evidence only).

विनियोग और वन्दना

MANTRA

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता, श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः॥
ॐ नमश्चण्डिकायै॥

Oṃ Asya Śrīargalāstotramantrasya Viṣṇurṛṣiḥ, Anuṣṭup Chandaḥ, Śrīmahālakṣmīrdevatā, Śrījagadambāprītaye Saptaśatīpāṭhāṅgatvena Jape Viniyogaḥ ||
Oṃ Namaścaṇḍikāyai ||

SHLOKA 1

मार्कण्डेय उवाच

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥

Oṃ Jayantī Maṅgalā Kālī Bhadrakālī Kapālinī |
Durgā Kṣamā Śivā Dhātrī Svāhā Svadhā Namo'stu Te ||

SHLOKA 2

जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते॥

Jaya Tvaṃ Devi Cāmuṇḍe Jaya Bhūtārtihāriṇi |
Jaya Sarvagate Devi Kālarātri Namo'stu Te ||

रूपं देहि: टेक वाली प्रार्थनाएँ

SHLOKA 3

मधुकैटभविद्राविविधातृवरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Madhukaiṭabhavidrāvividhātṛvarade Namaḥ |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 4

महिषासुरनिर्णाशि भक्तानां सुखदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Mahiṣāsuranirṇāśi Bhaktānāṃ Sukhade Namaḥ |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 5

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Raktabījavadhe Devi Caṇḍamuṇḍavināśini |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 6

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Śumbhasyaiva Niśumbhasya Dhūmrākṣasya Ca Mardini |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 7

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Vanditāṅghriyuge Devi Sarvasaubhāgyadāyini |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 8

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Acintyarūpacarite Sarvaśatruvināśini |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 9

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Natebhyaḥ Sarvadā Bhaktyā Caṇḍike Duritāpahe |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 10

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Stuvadbhyo Bhaktipūrvaṃ Tvāṃ Caṇḍike Vyādhināśini |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 11

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Caṇḍike Satataṃ Ye Tvāmarcayantīha Bhaktitaḥ |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 12

देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Dehi Saubhāgyamārogyaṃ Dehi Me Paramaṃ Sukham |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 13

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Vidhehi Dviṣatāṃ Nāśaṃ Vidhehi Balamuccakaiḥ |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 14

विधेहि देवि कल्याणं विधेहि परमां श्रियम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Vidhehi Devi Kalyāṇaṃ Vidhehi Paramāṃ Śriyam |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 15

सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Surāsuraśiroratnanighṛṣṭacaraṇe'mbike |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 16

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Vidyāvantaṃ Yaśasvantaṃ Lakṣmīvantaṃ Janaṃ Kuru |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 17

प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Pracaṇḍadaityadarpaghne Caṇḍike Praṇatāya Me |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 18

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Caturbhuje Caturvaktrasaṃstute Parameśvari |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 19

कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Kṛṣṇena Saṃstute Devi Śaśvadbhaktyā Sadāmbike |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 20

हिमाचलसुतानाथसंस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Himācalasutānāthasaṃstute Parameśvari |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 21

इन्द्राणीपतिसद्भावपूजिते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Indrāṇīpatisadbhāvapūjite Parameśvari |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 22

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Devi Pracaṇḍadordaṇḍadaityadarpavināśini |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

SHLOKA 23

देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥

Devi Bhaktajanoddāmadattānandodaye'mbike |
Rūpaṃ Dehi Jayaṃ Dehi Yaśo Dehi Dviṣo Jahi ||

समापन और फल

SHLOKA 24

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम्॥

Patnīṃ Manoramāṃ Dehi Manovṛttānusāriṇīm |
Tāriṇīṃ Durgasaṃsārasāgarasya Kulodbhavām ||

SHLOKA 25

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः।
स तु सप्तशतीसंख्यावरमाप्नोति सम्पदाम्॥

Idaṃ Stotraṃ Paṭhitvā Tu Mahāstotraṃ Paṭhennaraḥ |
Sa Tu Saptaśatīsaṃkhyāvaramāpnoti Sampadām ||

COLOPHON

इति देव्या अर्गलास्तोत्रं सम्पूर्णम्।

Iti Devyā Argalāstotraṃ Sampūrṇam |